National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 199-201
© 2025 NJHSR
www.sanskritarticle.com

**Dr.P.T.G.Bharatasekharacharyulu**
Assistant Professor,
Dept of Pancharatragama,
S.V.VedicUniversity.
Tirupati.

**Correspondence:**
**Dr.P.T.G.Bharatasekharacharyulu**
Assistant Professor,
Dept of Pancharatragama,
S.V.VedicUniversity.
Tirupati.

# श्रीपाञ्चरात्रागमे वाहनक्रमः

**Dr. P.T.G. Bharatasekharacharyulu**

**भारतीयसंस्कृतिः-**

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[1] इति

गौरवोक्तिः सहस्रेभ्यः वर्षेभ्यः पूर्वं भगवता मनुना भरतीयमूल्यानां विश्वोपयोगाय प्रकटीचकार। भारतीयतत्त्वचिन्तकैरेतादृशोक्तीभिः नैतिकमूल्यानि विश्वस्य मनुष्यमात्रमुद्दिश्य आविश्चक्रुः। **यत्र विश्वं भवत्येकनीळ**[2] **मिति** वेदकालीनवाक्यमेवाद्यापि बहूनां चिन्तकानां मानसपटलमान्दोलयति।

**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा** इत्युक्तिरपि भारतस्य शास्त्रीयवैज्ञानिकसैद्धान्तिकाभिवृद्धेः प्रमाणभूतमिति वक्तुं शक्यते। भारतीयशास्त्राणां वैभवमिदं भवति यत् शास्त्रं शास्त्रानुरूपेण जीवनेन च जनानां मार्गं दर्शयन्तो महापुरुषश्चेत्युभयमपि भारतीयसंस्कृतेः प्राणतुल्यम्। सत्पुरुषाः आध्यात्मिकदृष्ट्या शास्त्रणि रचयामासुः। रचितशास्त्रानुसारेण च विश्वमुन्नयन्ति। शास्त्राणि च सत्पुरुषान् प्रसिद्धयन्ति। भारतीयशास्त्राणां द्वे प्राणतुल्ये प्रमुखशास्त्रपरम्परे प्राचीनकालादद्यावधि समानरूपेण दरीदृश्येते। एका निगमपरम्परा अपरा आगमपरम्परा च।
दृश्यमानेऽस्मिन् प्रपञ्चे ये अदृश्यरूपेण परमात्मा अस्तीति निरूप्य निगमयति निगमः। तस्य परमात्मनः आगमनम् आराधनञ्च प्रबोधयति आगमः ।

पञ्चसु रात्रिषु परमात्मना स्वयं प्रबोधितः आगमः पाञ्चरात्रागमः। ज्ञानयोगक्रिया चर्या पादचतुष्टयात्मके आगमे चर्यापादे परमात्मनः पूजाविधानम्, उत्सवविशेषाश्च प्रबोधिताः ।

उत्सवसमये विविधवाहनेषु परमात्मनः उत्सवमूर्तिः विहरति । उत्सवेषु वाहनानाम् आवश्यकतायाः विषये विश्वामित्रसंहितायां उल्लेखः अस्ति । यत् यथा उत्सवमूर्तीनां वेषभूषाः प्रतिदिनं नवीनाः भवन्ति तथा कृत्रिमगजाश्वादियानानि प्रतिदिनं निर्मातव्यानि। आलयात् मन्दिरान्तरमण्डपेषु भगवतः पूजा कर्तव्या चेदपि वाहनानां प्रयोगः अनिवार्यः । उत्सवेषु अनिवार्यम् अस्ति।

**दिवसे दिवसे भूषाविशेषं कारयेदपि।**
**गजाश्वादिषु यानेषु कृत्रिमेष्वधिरोहयेत्॥**[3]

अद्यत्वे अस्य यानस्य आरोहणस्य नियमाः न प्रवर्तन्ते । एषा व्यवस्था तत्तद्देवतानां महिमानमाश्रित्य भवति। शिबिकारोहणं सर्वेषु उत्सवेषु विशेषता अस्ति। विश्वामित्रसंहितायां शिबिका नित्यनैमित्तिकाद्युत्सवेषु सर्वेषु विनियोज्या इति निरूपिता ।

उत्सवेतरसमयेषु तानि वाहनानि प्रत्येकवाहनशालायाम् उपस्थाप्यन्ते। पाञ्चरात्रागम संहितासु वाहनक्रमः श्रूयते। पाञ्चरात्रग्रन्थाः अष्टोत्तरशतसंख्याकाः इति श्रूयन्ते। परंतु नामानि शतद्वयाधिकान्येव श्रूयन्ते। अद्यतनकाले मुद्रिताः पाञ्चरात्रसंहिताग्रन्थाः ३९ (एकोनचत्वारिंशत्) उपलभ्यन्ते। तेषु पाञ्चरात्रग्रन्थेष्वपि ईश्वर, नारदीय, पारमेश्वर, पाद्म, श्रीप्रश्न, पाराशर्य, पुरुषोत्तम, विश्वामित्र, विष्वक्सेन, मार्कण्डेय, सात्वतसंहितासु वाहनप्रशंसा विद्यते।

सुप्रसिद्ध देवालय शिलाशासनेषु उत्सव, वाहन, अलंकरणादीनां निमित्तं कृताः दानधर्माः भगवदुत्सवमूर्तीनां वाहनविशेषाश्च प्रामाणिकतया उपलभ्यन्ते।

सम्प्रदायानुसारेण अध्यात्मरूपेण वाहनवैशिष्ट्यम् इत्थं प्रस्तूयते।

**१. शेषवाहनम् :-**

भगवन्तं शेषवाहने वैकुणठनाथमिव अलंकृत्य तिरुवीथ्युत्सवं निर्वहन्ति। भगवतः जीवस्य नवविधभक्तिसम्बन्धेषु मुख्यसम्बन्धः शेषि-शेष भावसम्बन्धः। तदानुगुण्येन शेषवाहनं दृश्यते। तद्वाहनदर्शनेन जीवस्य शेषत्वभावः प्रज्वलति।

**२. सूर्यप्रभावाहनम् :-**

सूर्यप्रभावाहने स्वामिनं सूर्यदेवमिव अलंकृत्य उत्सवं कुर्वन्ति। सूर्यः लोके अन्धकारं निर्मूल्य तेजः प्रसारयति। तत्सूर्यप्रभावाहनदर्शनेन जीवस्य अज्ञाननाशेन ज्ञानं प्रकाशते।

**३. चन्द्रप्रभावाहनम् :-**

चन्द्रप्रभावाहने धवळवस्त्रालंकृतः भगवतः दर्शनमात्रेण अस्माकं मनः सुनिर्मलं भवति।

**४. हंसवाहनम् :-**

हंसवाहने स्वामी शुद्धसत्त्वरूपेण विहरति । हंसवाहनारूढः स्वामी ज्ञान प्रदाता शुद्ध सत्त्वसम्पन्नः। तद्धंसवाहनदर्शनेन अस्मासु सत्त्वगुणः प्रचलति।

**५. सिंहवाहनम् :-**

सिंहः पराक्रमस्थे, पौरुषस्य च चिह्नम्। स्वामी नृसिंहरूपेण स्थितः।

तस्मात् तत्सिंहवाहनदर्शनेन अस्मासु शत्रुभयं, क्षुद्रभयं च विनाश्यति।

**६. हनुमद्वाहनम् :-**

हनुमद्वाहनं दासभावरूपम्। तद्वाहनारूढस्य रामस्य दर्शनेन जीवस्य दासत्वभावः प्रज्वलति ।

**७. गरुडवाहनम् :-**

गरुडः वेदात्मा इति **"यज्ञोवै विष्णुरिति"** श्रुतयः आदिशन्ति। तदनुरोधेन गरुडवाहनस्थ भगवद्दर्शनेन वेदाः यज्ञार्थ अभिप्रवृत्ताः इत्यवगन्तुं शक्यते ।

**८. गजवाहनम् :-**

गजवाहने स्वामिनं चक्रवर्ति रूपेण अलंकृत्य वीध्युत्सवं कारयन्ति। एष उत्सवः पुरुषोत्तमस्य सर्वोत्तमत्त्वं, सार्वभौमत्त्वं च प्रतिपादयति।

**इच्छामोहि महाभाहुं रघुवीरं महाबलं ।**
**गजेन महता यान्तं रामं छत्रा वृताननम् ।।**[4]

इत्युक्तत्वात् गजवाहन दर्शनेन सर्वान् कामान् आप्नुयामः ।

**९. रथोत्सवः :-**

रथश्थं केशवं दृष्ट्वा पुनर्जन्म न विद्यते। ब्रह्मोत्सवे रथोत्सव एव प्रधानोत्सवः । किमितिचेत् रथे सर्वान् देवान् आवाह्य स्वामिनं प्रतिष्ठापयन्ति। यो रथश्थं केशवं पश्यति सः अजायमानो भवति ।

**१०. अश्व वाहनम् : -**

अश्ववाहनं वेदस्वरूपस्य हयग्रीवस्य रूपं। अश्ववाहने आसीनस्य स्वामिनः दर्शने बुद्धिः विकसति।

१) पाञ्चरात्रागमानुसारेण वीरनारायणपुरं नाम यादवाद्रिक्षेत्रे उत्सवाः प्रचाल्यन्ते । तत्र वाहनक्रमः एवं विद्यते।[5]

| क्र.सं | दिवसः | वाहनक्रमः |
|---|---|---|
| १) | प्रथमेहनि | सर्वभूपालवाहनम् |
| २) | द्वितीयेहनि | शेषवानम् |
| ३) | तृतीयेहनि | नरांदोळिक, चन्द्रमन्डलवाहनञ्च |
| ४) | चतुर्थेहनि | वैरमुडि वज्रकिरीटधारणमहोत्सवः |
| ५) | पञ्चमेहनि | गरुडवाहनम् |
| ६) | षष्ठेहनि | अश्व, गजवाहने |
| ७) | सप्तमेहनि | स्वर्णान्दोवलिकावाहनम् |
| ८) | अष्टमेहनि | अश्ववाहनम् |
| ९) | नवमेहनि | सर्वभूपालवाहनम् |
| १०) | दशमेहनि | हनुमद्वाहनम् |

पाञ्चरात्रे पाराशर्यसंहितानुसारेण वाहनक्रमः एवं विद्यते।

**पुष्पके प्रथमे सायं द्वितीयेह्नि तमोपहे ।**
**तृतीये शेषशय्यायां चतुर्थे गरुडात्मके ।।**
**पञ्चमे आञ्जनेयस्यांशरूपे वाहने प्रभुम् ।**
**षष्ठे गजासने देवं सप्तमे पुष्पके पुनः ।।**
**अष्टमे तुरगे याने देवमारोप्य वैष्णवैः ।**[6]

| क्र.सं | दिवसः | वाहनक्रमः |
|---|---|---|
| १) | प्रथमेहनि | पुष्पमण्डपवाहनम् |
| २) | द्वितीयेहनि | सूर्यप्रभवाहनम् |
| ३) | तृतीयेहनि | शेषवाहनम् |
| ४) | चतुर्थेहनि | गरुडवाहनम् |
| ५) | पञ्चमेहनि | हनुमद्वाहनम् |
| ६) | षष्ठेहनि | गजवाहनम् |
| ७) | सप्तनमेहनि | पुष्पमण्डपवाहनम् |
| ८) | अष्टमेहनि | अश्ववाहनम् |

२) तमिलनाडुराज्ये तिरुवरूर् मण्डलान्तर्गते मन्नार्गुडिदिव्यक्षेत्रे ब्रह्मोत्सवे तृतीयदिनादारभ्य वाहनक्रमः विद्यते। हंस, गोवर्धन, पञ्चमुखाञ्जनेय, विहंग, शिबिक, सिंह, सूर्यप्रभ, शेष, गरुड, कल्पद्रुम, आञ्जनेय, गज, पुष्पक, सुवर्णमहारथ इत्येतानि वाहनानि प्रतिपादितानि। पाराशर्यसंहितायाम् अनेकविधाः वाहनक्रमाः विद्यन्ते।

३) अन्तर्वेदिक्षेत्रे श्रीलक्ष्मीनरसिंहस्वामिसन्निधो माघशुद्ध नवम्याः आरभ्य महोत्सवः प्रचलति। तन्त्र वाहनक्रमः एवं विद्यते।

| क्र.सं | दिवसः | प्रातः वाहनक्रमः | रात्रिः वाहनक्रमः |
|---|---|---|---|
| १) | प्रथमेहनि | ध्वजारोहणम् | |
| २) | द्वितीयेहनि | पञ्चमुखाञ्जनेयवाहनम् | |
| ३) | तृतीयेहनि | रथोत्सवः | |
| ४) | चतुर्थेहनि | शेषवाहनम्, | तुंगवृक्षवाहनम् |
| ५) | पञ्चमेहनि | राजाधिराजवाहनम् | सिंहवाहनम् |
| ६) | षष्ठेहनि | हंसवाहनम्, | अश्ववाहनम् |
| ७) | सप्तमेहनि | पुष्पकवाहनम् | |

एवम् अन्तर्वेदिक्षेत्रे वाहनक्रमः दृश्यते।

४) श्रीपाञ्चरात्रागमे ईश्वरसंहितायाम् ११ (एकादश) अध्याये वाहनक्रमः प्रस्फुटं प्रतिभाति।

**वाहनारोहणंत्वेवं कुर्याद्दिवस्य नित्यशः।**
**प्रथमे शिबिकायानं द्वितीये शेषपीठिका ।।**
**तृतीये चन्द्रबिम्वं च दिवा चेत्सूर्यमणडलम्।**
**चतुर्थे दिवसे प्राप्ते पुष्पमण्टपवाहनम् ।।**
**पञ्चमे दिवसे प्राप्ते गरुडारोहणं भवेत्।**
**षष्ठेदिने तु सम्प्राप्ते .....................** [7]
**ततो देवमलंकृत्य कुर्यात्सम्यग्गजोत्सवम् ।**
**सप्तमे दिवसे प्राप्ते कृत्वा बल्यन्तमर्चनम्।।**
**प्रतिष्ठितं रथं पूर्वं सर्वलक्षणसंयुतम् ।**[8]
**अष्टमेह्नि तु तद्रात्रौ डोलारोहणपूर्वकम्।**
**अश्वारोहं ततः कुर्यान्मृगयां चापि कारयेत् ।।**[9]
**नवमेऽवभृथं कुर्यात् तद्रात्रौ शिबिकोत्सवम् ।**
**वाहनारेहण स्यैवं क्रमः सम्यङ्गिनरूपितः ।।**[10]

| क्र.सं | दिवसः | प्रातः वाहनक्रमः | रात्रिः वाहनक्रमः |
|---|---|---|---|
| १) | प्रथमेह्नि | शिबिका | |
| २) | द्वितीयेह्नि | शेषवाहनम् | |
| ३) | तृतीयेह्नि | सूर्यवाहनम् | चन्द्रवाहनम् |
| ४) | चतुर्थेह्नि | पुष्पमण्टपम् | |
| ५) | पञ्चमेह्नि | गरुडवाहनम् | |
| ६) | षष्ठेह्नि | गजवाहनम् | |
| ७) | सप्तमेह्नि | रथोत्सवः | |
| ८) | अष्टमेह्नि | अश्ववाहनम् | मृगयात्रा |
| ९) | नवमेह्नि | अवभृथस्नानम्, | शिबिका |

इत्थं वाहनक्रमः ईश्वरसंहितायां निरूपिता।

५) पुरुषोत्तमसंहितायां २४ चतुर्विंशे अध्याये वाहनक्रमः इत्थमस्ति। प्रथमेहनि देवस्य हंसवाहनमिष्यते।

**द्वितीयेहनि सिंहं च तृतीये तु खगेश्वरः ।।**
**चतुर्थेहनि शेषश्च पञ्चमे चाञ्जनीसुतः ।**
**षष्ठेतु सूर्यचन्द्रौ च रथारोहंतु सप्तमे ।।**
**अष्टमे तु तुरंगस्य नवमे गजमेव च।**
**याळी पुष्पकयानादिवाहनानि यथेच्छया ।।**[11]

इति वाहनक्रमः पुरुषोत्तमसंहितायां चतुर्विंशेध्याये निरूपितः ।

६) पाञ्चरात्रसम्बन्धिषु देवालयेषु उत्सवे वाहनक्रमनिरूपणे सम्प्रदायस्यैव विशेष प्राचुर्यं विद्यते। पूर्वाचार्यपरम्परया तथैव क्रियन्ते। एवंप्रकारेण पाञ्चरात्रागमानुसारेण उत्सवेषु वाहनक्रमः इत्थमस्तीति निरूपितम्।

| क्र.सं | दिवसः | वाहनक्रमः |
|---|---|---|
| १) | प्रथमेह्नि | हंसवाहनम् |
| २) | द्वितीयेह्नि | सिंहवाहनम् |
| ३) | तृतीयेह्नि | गरुडवाहनम् |
| ४) | चतुर्थेह्नि | शेषवाहनम् |
| ५) | पञ्चमेह्नि | हनुमद्वाहनम् |
| ६) | षष्ठेह्नि | सूर्य,चन्द्रौ |
| ७) | सप्तमेह्नि | रथोत्सवः |
| ८) | अष्टमेह्नि | अश्ववाहनम् |
| ९) | नवमेह्नि | गजवाहनम् |

७) नालायिरदिव्यप्रबन्धेपि विविधवाहनविशेषाः दिव्यसूरिभिः संकीर्तिताः ।

८) साम्प्रदायिकाः ज्योतिश्शास्त्राणुगुण्येन ग्रहशान्तिरपि वाहनोत्सवद्वारा कर्तुं शक्यते इति निरूपयन्ति। कथमिति चेत्।

**तत्तद्ग्रहशान्तिः – वाहनोत्सवः**

| क्र.सं | ग्रहः | वाहनक्रमः |
|---|---|---|
| १) | रविग्रहस्य | सूर्यप्रभवाहन द्वारा |
| २) | चन्द्रग्रहस्य | चन्द्रप्रभवाहन द्वारा |
| ३) | कुजग्रहस्य | हनुम, सिंहवाहने द्वारा |
| ४) | बुधग्रहस्य | रथ, शिबिके द्वारा |
| ५) | गुरुग्रहस्य | अश्ववाहन द्वारा |
| ६) | शुक्रग्रहस्य | गजवाहन द्वारा |
| ७) | शनिग्रहस्य | गरुडवाहन द्वारा |
| ८) | राहुग्रहस्य | शेष वाहन द्वारा |
| ९) | केतुग्रहस्य | तुंगवृक्षवाहन द्वारा |

एवं ग्रहशान्तिः कर्तुं शक्यतेति वाहनक्रमः ज्योतिश्शास्त्रानु सारेण पण्डितैः निर्धारितः।


**<u>उपयुक्त विषयाणां ग्रन्थसूची-</u>**

1 ईश्वरसंहिता- पि.बि. अनन्ताचार्यास्वमी. काञ्चीपुरम्. 1921

2 पुरुषोत्तमसंहिता- जीयर् ऎड्युकेषनल् ट्रस्ट् . सीतानगरम्. 2009

3 पाराशर्यसंहिता- वेणुगोपालस्वामि मन्दिरम्. मन्नार्गुडि. तमिळ् नाडु. 2005

4 श्रीमद्रामायणम् - गीताप्रॆस्, गोरखपूर्. 2008

5 विश्वामित्रसंहिता -राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः.1991

6 मनुस्मृतिः- डा ।। एन्.एल्. नरसिंहाचार्यः गायत्रीप्रचुरणम्. 2008


**संदर्भ ग्रंथ**

1मनुस्मृति२-२०

2तैत्तियारण्यकं ६.३

3विश्वामित्रसंहिता -

4रामायणे अयोध्याकाण्ड. २.२२

5वैरमुडिब्रह्मोत्सवाह्वानपत्रिका, मेल्कोट.

6पाराशर्यसंहिता २७.६-८

7ईश्वरसंहिता ११.२६०-२६२

8ईश्वरसंहिता ११.२७८.२७९

9ईश्वरसंहिता ११.३१२.

10 ईश्वरसंहिता ११.३१४– ३१५

11 पुरुषोत्तमसंहिता २४.७५-७७